। अर्हम् ।

विक्रमादित्यनृपालप्रतिबोधकेन वादिवृन्दारकवृन्दवारणपञ्चाननेन
कमनीयतमकविताल्लतालवालकल्पेन तुलनातीतकल्पना-
शिल्पशिल्पिशेखरेण सूरिशेखरेण भगवता
श्रीसिद्धसेनदिवाकरेण प्रणीता—

द्वात्रिंशद् द्वात्रिंशिकाः ।

[प्रथमा द्वात्रिंशिका]

तपोगच्छाधिपति शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीविजय-नेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति शास्त्रविशारद-कविरत्नेति-पदालङ्कृतेन विजयलावण्यसूरिणा विरचिता—

किरणावली नाम विवृति –

यज्ज्ञाने भाति विश्वं करतलफलवद् योगिभिर्यत्स्वरूपं,
ध्येयं वाणी यदीया विलसति भुवने सत्यमात्रऽप्यबाध्या ।
कामक्रोधादिवर्गो निधनमुपगतो यत्र यं पूजयन्ति
पूज्या अन्ये तमीशं जिनवरमवरं वर्धमानं वरेण्यम् ॥ १ ॥—स्रग्धरा

वाग्देवी यत्र नृत्यत्यमलगमकलिताऽनल्पतर्कप्रगल्भा,
स्याद्वादोद्गारदक्षा जयति बुधवरैर्भावितापीऽनवद्या ।
तं नत्वा सिद्धसेनं विमलमतिगुरुं कल्पनाशिल्पिमुख्यं,
नव्यस्तुत्यादिदक्षं सततमभिनवे मानसेऽभीष्टसिद्ध्यै ॥ २ ॥—स्रग्धरा

यस्य व्याकृतिनाट्यचर्वणकला हृत्वा समुज्जृम्भते
शास्त्रार्थं प्रतिवादियुक्तिदलनं विद्योतते सर्वतः ।
न्यायाद्यर्थविचारणाऽपि विमला यस्य क्रियासु स्थिरा,
भक्त्या तं प्रणमामि हृत्कमलगं श्रीनेमिसूरिं गुरुम् ॥ ३ ॥—शार्दू०

ॐ श्रीमत्सिद्धसेनस्तुतिततिरचना गूढनाम्ना प्रथमा ?
स्याद् व्याख्यानुकामो विमतिमतिधिया सर्वदर्शीति पुष्ट ? ।
सत्यस्यैव विभूत्वन् स्तुतिनिचयिमदो सूरिणा कल्पनामा
न स्यो हास्यो बुधानां मद्गुणगणार्थे यद् यथाशक्ति यामि ॥१॥—स्रग्धरा
प्रणिपत्य गुर्वाम्नाय कृतज्ञ कृतिकर्मणि ।
विवृतौ किरणावल्यां, मान्यताम्भु गुरा कृपा ॥ २ ॥

श्रीमान् भगवान् आचार्यः सिद्धसेनदिवाकरः पञ्चविंशतिभद्रा द्वात्रिंशिका निर्मितुमनास्तासु प्रथमां द्वात्रिंशिकामारभमाणो विघ्नविनाशाय शिष्टाचार परम्पराप्रतिपालनाय च त्रिभिः श्लोकैः परमेश्वरपदद्वयग्रामपूर्वकं तत्स्तुतिं प्रतिजानीते—

स्वयम्भुव भूतसहस्रनेत्र
मनेकमेकाक्षरभावलिङ्गम् ।
अव्यक्तमव्याहतविश्वलोक
मनादिमध्यान्तमपुण्यपापम् ॥ १ ॥ [उपजाति]

समन्तसर्वाक्षगुणं निरक्षं,
स्वयम्प्रभं सर्वगतावभासम् ।
अतीतसंख्यानमनन्तकल्प
मचिन्त्यमाहात्म्यमलोकलोकम् ॥२॥ [इन्द्रवज्रा]

कुहेतुतर्कोपरतप्रपञ्च
सद्भावशुद्धाप्रतिवादवादम् ।
प्रणम्य सच्छासनवर्धमानं,
स्तोष्ये यतीन्द्रं जिनवर्धमानम् ॥ ३ ॥

[उपजाति । त्रिभिर्विशेषकम्]

स्वयम्भुवमिति स्वयं भवतीति स्वयम्भूस्तं स्वयम्भुवम् उपदेशादि सत

१ अधुनापरुभ्यमन्तर्विंशतिद्वात्रिंशिकापेक्षयाभिधानम् ।

द्वितीयान्तं जिनवर्धमानम्' इत्यस्य विशेषणम्, यत 'जिनवर्धमानं स्तोष्ये' इत्यनेन जिनवर्धमानकर्मकस्तुतिक्रियाकर्तृत्वप्रकारकसिद्धसेनदिवाकरविशेष्यक प्रतीतौ जातायामपि कीदृशं जिनवर्धमानमित्याकाङ्क्षोत्थितैव, अप्रकृष्टस्य स्तुति कर्मत्वासम्भवात्, अतस्तत्प्रकर्षावगमकं विशेषणमुपादेयमेवेति,

' देवदत्त स्वयं गच्छेत्, त्वं वीक्षस्व स्वयं तथा ।
अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते ॥ " [ ]

इति वचनात् प्रथम-मध्यमोत्तमपुरुषेष्वात्मस्वविशेषेण स्वयंशब्दप्रयोगात्,

'इदं रूपमिदं वस्त्रमिति यद्वादद तथा ।
असौ त्वमहमित्येषु, स्वयमित्यभिधीयते ॥ १ ॥
स्वयमात्मेति पर्यायौ तेन लोके तयो सह ।
प्रयोगो नास्त्यत स्वत्वमात्मत्वं चान्यवारकम् ॥ २ ॥' [ ]

इत्यादिवचनात् स्वयम्भुवमित्यस्य आत्मभुवमित्यर्थ "भू सत्तायाम्' इति धातुपाठात् प्रकृते भूधातो सत्त्वमेवार्थ, "उत्पाद व्यय ध्रौव्ययुक्तं सत्" [तत्त्वार्थ० अ० ५ सू २९] इति सूत्राद् उत्पाद-व्यय ध्रौव्ययुक्तत्व सत्त्वम्, तत्र स्वयंशब्दार्थानुगमनाद् आत्मना यदुत्पद्यते आत्मना यद् विनश्यति, आत्मना यद् ध्रुवं तत् स्वयम्भूशब्दवाच्यमिति, प्रतिक्षणं वस्तुमात्रं केनचिद् रूपेणोत्पद्यते केनचिद् रूपेण विनश्यति केनचिद् रूपेणावतिष्ठत इति सद् भवति, जिनवर्धमानोऽपि वस्तुसामान्यान्तर्गत केनचिद् रूपेणोत्पद्यमानत्वात् केनचिद् रूपेण विनश्यमानत्वात् केनचिद् रूपेण स्थीयमानत्वात् सन् स्यादेव, तावताऽन्यवस्तुभ्यो वैशिष्ट्यं न लभ्यत इति तद्विशेषणसामर्थ्यात् स्तुतियोग्यत्व नायाति, अत 'सन्तम्' इत्यनुक्त्वा 'स्वयम्भुवम्' इत्युक्तम् राग द्वेषादिशत्रुगण मुक्तात्मस्वरूपस्य जिनवर्धमानस्य तदवस्थाया पूर्वक्षणे वर्त्तमानक्षणेऽनागतक्षणे चोपयोगलक्षणात्मकात्मसामान्यरूपेणैव पूर्वक्षणवर्त्तित्वविशिष्टात्मरूपेण विलयो वर्त्तमानक्षणवर्त्तित्वविशिष्टात्मरूपेणोत्पादो निर्विशेषितात्मस्वरूपेणावस्थानमित्युत्पाद व्यय ध्रौव्यावच्छेदकात्मनो विशेषणविनिर्मोकेण विशेष्यीभूतस्यात्मसामान्य रूपतयोत्पाद-व्यय ध्रौव्यलक्षणसत्त्वमित्यन्यस्माद् व्यावर्त्तकत्वेन भवति तद्विशेषणस्य स्तुत्युपयुक्तवैशिष्ट्यावेदकत्वम् यद्यप्युक्तदिशोत्पादादित्रयावच्छेदकत्वमात्म सामान्यस्य तथापि 'तत् त्वमसि'' [छान्दो ६।८।७] इति वाक्ये तत् त्वम् पदयो'

माधावच्छिन्नधर्मान्याऽन्त करणावच्छिन्नचैतन्यदाक्याजेहदमहङ्कभगवा शुद्धचैत न्यप्रतिपादकत्ववत् स्वयम्भूशब्दस्य औपलक्षणनित्यत्वप्रतिपादकत्वम्, अतएव

> ' स्वयम्भुरेष भगवान्, धर्मो गीतस्त्वया पुरा।
> शिवाद्या ऋषिपर्यन्ता स्मर्तारोऽस्य न कारका ॥ १ ॥" [ ]

इत्यत्र यद्दस्य नित्यत्वावगतये स्वयम्भुशब्द प्रयुक्त, जिनवर्धमानस्योपयोग लक्षणात्मसामान्यरूपेण नित्यत्वमपि वैशिष्ट्यावेदक, क्षणिकविज्ञानसन्तानस्वरूप सुगतस्तनयाऽभ्युपगतात्मस्वरूपतो व्यावर्तकत्वात्, उक्त च <u>यशोविजयोपाध्यायै</u> <u>र्महावीरस्तवप्रकरण</u>—

> "आत्मा तु तावदपि मुख्यतमोऽस्ति नित्य-
> स्तद्भावतोऽव्ययनयात् गगनादिवत् स ।
> चिन्मात्रमेव तु निरन्वयनाशि तत्र,
> क श्रद्दधातु यदि चेतयते सचेता ॥ ४ ॥ इति,

अनेन च पराभ्युपगतलोकपितामहब्रह्मस्कन्दस्वयम्भूशब्दप्रतिपाद्यत्वेन ब्रह्मा भेदोऽस्य ख्यापितो भवति, तथा चेश्वरत्वेन पितामह चिन्तयता <u>पौराणिका</u> नामप्ययमुपास्य इति व्यञ्जयत अद्वा सु-सर्वोत्तिशायि, यद् अयम्-इष्टफलजनक पुण्यकर्म तीर्थङ्करनामकर्मेति यावत्, तत् स्वयम्, तत् भवत-प्राप्नोतीति स्वयम्भूर्त तथा तीर्थङ्करमित्यर्थ 'भूङ् प्राप्तौ णिङ्' [सिद्ध० ३ ४ १९] इति वचनात् प्राप्तावपि भूधातुर्वर्तते पृषोदरादित्वात्सागमश्च; यद्वा स्वयम्-आत्मनैव, परोपदेशस्य निरपेक्षतयेत्यर्थ, भवति-भगवत्तया सम्पद्यत इति स्वयम्भू, स्वयसम्बुद्ध इत्यर्थ व तथा।

पुन कथम्भूतम्? भूतसहस्रनेत्रमिति-भूतेषु-प्राणिषु, सहस्रनेत्र इव-स्वर्लोकाधिप इन्द्र इवेति भूतसहस्रनेत्र, तम् यथा सहस्रनेत्र इन्द्र ऐश्वर्य शालित्वेन प्रागुदिगधिपतित्वेन च प्राणिभिरुपास्यो भवति तथाऽयमपि भगवान्। एकदिक्पालाभेदाध्यासेन सर्वदिक्पालाभेदाध्यासोऽभिमतोऽभिव्यज्यते, अथवा भूतानां-प्राणिनां सहस्र भूतसहस्र तस्य नेत्र-नयनमिव, यथा नेत्रेण पुरोऽवस्थित वस्तु स्पष्टमवगच्छन्ति लोकास्तथा हितमिदमहित चेदमित्येव विभज्य स्पष्टमव गच्छन्ति भगवदुपदिष्टागमेनत्यागमद्वाराऽखिलहिताहितमार्गप्रकाशत्वेन जिनवर्धे
७५ भवति भूतसहस्रनेत्ररूपत्वम् यद्वा भूतानि-पूर्वं जातानि, सहस्र

नेत्राणि यस्य स भूतसहस्रनेत्रस्तम्, अनादौ संसारे भगवानपि स्वर्लोकाधिपति-रिन्द्रो बभूवेति अनेन यद् यद् विभूतिमत् सत्त्वं लोकेऽवलोक्यते तत्तद्रूपेणा-नादौ संसारे जात एव भगवानिति तत्तद्रूपेणापि स्तुत्योऽयमिति व्यज्यते अथवा भूत -प्रथमं जात, सहस्रनेत्र -इन्द्रो यस्य स भूतसहस्रनेत्रस्तम्, 'उपेन्द्र इन्द्रावरजः' इति कोशादिन्द्रस्य कनिष्ठभ्रातोपेन्द्रो विष्णुस्तद्रूपोऽयमिति ये विष्णुमीश्वरबुद्ध्योपासते वैष्णवास्तेषामप्युपास्योऽयमिति व्यज्यते यद्वा भूत-सहस्रस्य-प्राणिसहस्रस्य नेत्रं यस्मिन् स भूतसहस्रनेत्रस्तम्, सहस्रेत्युपलक्षण-मसङ्ख्यसङ्ख्यायास्तस्य, तेन सर्वेषां प्राणिनां यस्मिन्नात्मदृष्टिः सञ्जाता, यं सर्वेऽपि प्राणिन आत्मत्वेन पश्यन्तीति यावत्, एतावता सर्वोपास्योऽयमिति व्यज्यते यद्वा 'भैरवो भूतनाथश्च' इत्यादिवचनाद् भूतनाथं शिवमित्यर्थः, एतेन शैवानामप्ययमुपास्य इति व्यज्यते।

पुनः किम्भूतम्? अनेकमिति-एकस्य सत उत्पाद-व्ययाद्यनेकरूपता-मन्तरेण नोपपद्यते न च तामन्तरेणोत्पाद-व्यय-ध्रौव्यलक्षणं सत्त्वं सम्भवतीति पर्यायार्थिकनयेन पर्यायरूपत्वमेव वस्तुन इति पर्यायाणामनेकत्वादनेकरूपम्, प्रकृते गुण-गुणिनोः कथञ्चिदभेदात् केवलज्ञान दर्शन चारित्रैतद्गुणत्रयात्मकत्वे-नानेकम्, तथा धर्म धर्मिणोः कथञ्चित्तादात्म्यसम्बन्धस्याभ्युपगमेनानन्तस्व-पर पर्यायात्मकधर्मात्मकत्वेनानेकम्, एतेन साक्षात् परम्परया वा स्वसम्बन्धिभिन्न पर रूपाभ्यां समस्तमेव विश्वं व्याप्तोऽसौ विषयतया केवलज्ञानादिरूपेण चेति व्यापकत्वाद् यदि हरिर्विष्णुरिति गीयते तदाऽयमपि विष्णुः, दशावतारादि-नाऽनन्तानेकरूपत्वाद् यद्युपास्यो विष्णुस्तदा सर्वदैवानेकरूपत्वात् कथं नायमु-पास्य इति व्यज्यते। पर्यायदृष्ट्योत्पाद-व्ययभाजनत्वेन यथाऽनेकत्वमस्य तथा द्रव्यार्थिकदृष्ट्या ध्रौव्यभाजनत्वेनैकत्वमप्यस्येत्याह—

एकाक्षरभावलिङ्गमिति-एकः -अनेकानुगतः अक्षरः -अविनाशी, यो भावः -सामान्यात्मा तिर्यक्सामान्यरूप ऊर्ध्वतासामान्यरूपश्च, तद्रूपात्मना लिङ्ग्यते ज्ञायते इत्येकाक्षरभावलिङ्गस्तम्, तिर्यक्सामान्यं च विभिन्नदेशावस्थितानेक-व्यक्त्यनुगतसमानाकारपरिणामस्वरूपम्, ऊर्ध्वतासामान्यं च पूर्वापरपर्यायानु-स्यूतं द्रव्यम् प्रकृते आत्मत्वलक्षणतिर्यक्सामान्येनात्मस्वरूपतया पूर्वापरवर्तीय पर्यायानुस्यूतजिनवर्धमानात्मकद्रव्येण व्यक्तिरूपतया च आत्मैवायं स एवायं

जिनवर्धमान' इत्येवं गायत इति, अनेकम् इत्यनेनान्यतो व्यावृत्तस्वरूपत्वेन विशेषरूपत्वम् 'एकाक्षरभावलिङ्गम्' इत्यनेनानुवृत्तस्वरूपत्वेन सामान्यरूपत्व मित्येवं सामान्यविशेषोभयस्वरूपत्वं तन्निमित्तं चैकानेकस्वरूपत्वं जिनवर्धमान स्योपदर्शयता सत्त्वं निष्टङ्कितम्, सामान्यस्वरूपत्वमनुगतबुद्धिविषयत्वेन विशेष स्वरूपत्वं व्यावृत्तिबुद्धिविषयत्वेन भवत एव वस्तुनो न व्यतिरिक्तसामान्य विशेषलक्षणपदार्थसम्भवात्, तथाऽभ्युपगमस्य 'धर्मिकल्पनातो धर्मकल्पना लघीयसी' इति न्यायेन वस्तुन्येव सामान्यस्य विशेषस्योभयकल्पनेन पराहत त्वात्, तदुक्तम्—

> 'स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो, भावा न भावान्तरनेयरूपाः ।
> परात्मतत्त्वादतथात्मतत्त्वाद्, द्वयं वदन्तोऽकुशलाः स्खलन्ति ॥ ४ ॥'
>
> —[अन्ययोगव्यवच्छेदद्वात्रिंशिका] इति
>
> "अनेकमेकात्मकमेव वाच्यं द्वयात्मकं वाचकमप्यवश्यम् ।
> अतोऽन्यथा वाचकवाच्यक्लृप्तावतावकानां प्रतिभाप्रमादः ॥"

"अनेकमेकात्मकमेव सत्त्वमनोऽन्यथा सत्त्वमसूपपादम् ।
तन्नित्यमेवैकमनित्यमन्यदिति त्वदाज्ञाद्विषतां प्रलापाः ॥६॥' [अन्य०द्वा०]

इति च अथवा एकाक्षरस्य भाव -परिणाम एकाक्षरस्य यत्र स एकाक्षरभाव, अकारा ऽकारा ऽऽकारोकारमकाररूपाण्यनेकान्यक्षराणि ओंकाराक्षररूपेण परि णमन्ते, एकाक्षरता चोपयान्ति ओंकारे इति एकाक्षरभाव ओङ्कार, स एव प्रतिपादकत्वेन लिङ्ग-चिह्न यस्य स एकाक्षरभावलिङ्ग, तम्, 'अर्हन्, सिद्ध, आचार्य, उपाध्याय मुनि' इति पञ्च परमेष्ठिन पदैकदेशो पदसमुदायो पचारात् तत्राद्यस्यादिगतोऽकारो वाचक, द्वितीयस्याशरीरिण सिद्धस्यादि गतोऽकारो वाचक तृतीयस्यादिगत आकारो वाचक चतुर्थस्यादिगत उकारो वाचक, पञ्चमस्यादिगतो मकारो वाचक, 'अ+अ+आ+उ+म्' इति पञ्चानां मेलनेन निष्पन्न ओङ्कार पञ्चपरमेष्ठिवाचकत्वम् तथा च पञ्चपरमेष्ठिवाच कोङ्कारप्रतिपाद्यस्य पञ्चपरमेष्ठ्यन्तर्गतस्य परमात्मनो जिनवर्धमानस्य सुतरां घटते अथवा एकाक्षरम्-ओङ्कारस्वरूप यस्य भावस्वरूपप्रतिपादकत्वेन भावलिङ्ग स एकाक्षरभावलिङ्ग तम्, जिनवर्धमानो हि नाम-स्थापना द्रव्य भावभेदेन चतुर्धा, तत्र यस्य कस्यचित् जिनवर्धमान इति नाम क्रियते स नामजिनवर्धमान, जिनवर्धमानस्य प्रतिकृति सद्भूताऽसद्भूता या स्थाप्यते सा स्थापनाजिनवर्धमान, योऽसौ जीवो जिनवर्धमानस्वरूपेणोत्तरकाल परिण

मिष्यति स द्रव्यजिनवर्धमान, यश्च जिनवर्धमानो घातिज्ञानावरणीयादिकर्म चतुष्टय सयथोन्मूल्याऽघातिकर्मचतुष्टयमुपभोगेन क्षपयित्वा तीर्थादिक्रिया कुर्वंस्तान्ते स भावजिनवर्धमान, तस्य प्रतिपादक ओङ्कार इति, एतेनाकारोकार मकारा रजोगुणादियुक्तानां ब्रह्म विष्णु रुद्राणा प्रतिपादका, तत्सद्वितिसमूतिश्चो ङ्कारस्तुरीयस्य निर्गुणस्य सदाशिवस्य प्रतिपादक, तं सदाशिव शैवा ईश्वरबुद्ध्यो पासते, निर्विशेषितलिङ्गस्वरूपतया च लोके प्रसिद्धत्वा महादेवस्तथाभूत एव पूज्यते अतो जिनवर्धमानोऽपि विशिष्टलिङ्गस्वरूपतयोपवर्णितो विशिष्टस्य पुरुषेण सह कथञ्चिदभेदाच्छुद्धलिङ्गस्वरूपो भीति शैवानामप्युपास्य इति व्यज्यते ।

पुन कीदृशम् ? अव्यक्तम् अस्मदादिप्रत्यक्षागोचरम् तेन स्वसंवेदनप्रत्यक्ष दयत्प्रत्यक्षविषयत्वेऽपि न क्षति अस्मदादिप्रत्यक्षाविषयत्वस्य परमाण्वादि साधारणत्वऽपि स्वयम्भूत्वादिगुणमहत्त्वस्य तस्योपास्यत्वप्रयोजकोत्कर्षविशेषा धायकत्व सम्भवति अस्मदादिप्रत्यक्षागोचरगुणविशेषवत्त्वं वाऽव्यक्तत्वम् तस्य च परमाण्वाद्यगतत्वेनोत्कर्षविशेषाधायकत्व सम्भवति यथा परमाण्वादीनाम स्मदादिप्रत्यक्षागोचरत्वेऽपि धर्माऽधर्मयोरदृष्टत्व तथेदमपि जिनवर्धमानत्वे वति, प्राकृतमव्यक्तनिकादिव येषु येऽव्यक्तं प्रधानमुपासते तदा प्राकृतिको बन्ध इति साङ्ख्या आमनन्ति, अव्यक्त–प्रधानमीश्वरबुद्ध्या चिन्तयतां दशमन्वन्तर समय यावद् विगतज्वरत्वमवस्थानम्

"दशमन्वन्तराणाह तिष्ठन्त्यव्यक्तचिन्तका ।
बौद्धा दश सहस्राणि सहस्र स्वाभिमानिका ॥ ७ ॥ ' [ ]

इति वचनात्, बुद्ध्यहङ्कारादय प्रकृतयश्चैव भवन्ति–आविर्भवन्ति व्यक्त शब्दप्रतिपाद्या, प्रकृतिस्तु मूलकारणं न कुतश्चित् प्रादुर्भवतीत्यव्यक्तशब्दप्रति पाद्या, तदुपासकाना प्राकृतिको बन्धो भवति, अव्यक्त जिनवर्धमानमुपासतां पुनर्मुक्तिरेवाचिरेण सम्पद्यत इति तमेवाश्रयन्तु अव्यक्तचिन्तका इति व्यज्यते ।

पुन कीदृशम् ? अव्याहतविश्वलोकमिति–न व्याहन्यते–आवरणेन विच्छिद्यत इति अव्याहत, विश्वलोक –समग्रलोक, निखिलपदार्थ इति यावत्, अव्याहतो विश्वलोको यस्य सोऽव्याहतविश्वलोकस्तमव्याहतविश्वलोकम्, कर्मा वरणरहितत्वेन सकलपदार्थमस्य अथवा शरीरसम्बन्धलक्षणोर्ध्वगमनस्वभाव व्याघातकाभावाद् अव्याहत –अप्रतिबद्धोर्ध्वगमनस्वभावो देदयमूत, विश्व लोक –सम्यग्धर्माऽस्तिकायाधर्माऽस्तिकायावच्छिन्नाकाशो यस्य सोऽव्याहतविश्व

लोकस्त्रमव्याहतविश्वलोकम्, मुक्तिधामोपगतमित्यर्थः, सर्वज्ञतया मुक्ततया वा ये ईश्वरमुपासते तेषामप्ययमुपास्य इति व्यज्यते।

पुनः किम्भूतम्? अनादिमध्यान्तम् आदिश्च मध्यं चान्तश्च आदिमध्यान्ताः, न विद्यन्ते आदि मध्या ऽन्ता यस्य सोऽनादिमध्यान्तस्तम्, द्रव्यार्थिकनयेनेदम्, जिनवर्धमानस्य परमात्मन उपयोगस्वरूपेण सर्वदावस्थायिनोऽनादिमध्यान्तत्वं घटते यो हि उत्पद्यते विनश्यति च तस्य य उत्पत्तिकालः स आदिः, यश्च स्थितिकालः स मध्यम्, यश्च विनाशकालः सोऽन्त इति सर्वदाऽवस्थितिकालश्च नान्मिध्यान्तवालो भवतीति, मूल स्कन्ध शाखा प्रशाखादिस्वरूपेणावस्थितस्य वृक्षादेरवयविनो दन्त आदिमध्यान्तव्यवस्था भवति यतो मूलं तस्यादिः, स्कन्धो मध्यः, शाखा प्रशाखादिकं चान्त इति, निरवयवस्य त्वखण्डस्य परमात्मनो न दशतोऽपि तद्व्यवस्थेति भवति तथावैलक्षण्यमुत्कर्षाधायकम्, अनेन चानादिमध्याऽन्त निर्गुण ब्रह्मोपासता यदान्तिनामप्युपास्यत्वमस्येति व्यज्यते।

पुनः किम्भूतम्? अपुण्यपापं पुण्यं च पापं च पुण्य-पापे, न विद्येते पुण्यपापे यस्य सोऽपुण्यपापस्तम्, पुण्य पापरहितमित्यर्थः, पुण्यपापरहितत्वस्य घटपटादिजडपदार्थगतस्य नोपास्यत्वप्रयोजकत्वमतः पुण्य पापरहितात्मत्वमनेन विवक्षितमिति बोध्यम्। तृतीयपादस्य स्यादिन्द्रवज्रा यदि तौ ज गौ ग" इति लक्षणलक्षितत्वादिन्द्रवज्रात्वम्, प्रथम द्वितीय चतुर्थपादानां तु 'उपेन्द्रवज्रा प्रथमे लघौ सा' इति लक्षणलक्षितत्वादुपेन्द्रवज्रात्वम्, उभयमिलनेन निष्पन्नत्वादुपजातिवृत्तमिदम्॥ १॥

पुनः किम्भूतम्? समन्तसर्वाक्षगुणं समन्तात्-सर्वप्रकारतः, सर्वेषाम्, अक्षाणाम्-आत्मनाम्, गुणा ज्ञानादयो यत्र स समन्तसर्वाक्षगुणस्तम्, यद्यपि *यस्य कस्याप्येकस्यात्मन एकोऽपि गुण एकेनापि प्रकारेण कथञ्चित्तादात्म्यलक्षण*विष्वग्भावसम्बन्धेन नान्यात्मनि वर्त्तत इति सर्वप्रकारेण सर्वात्मसम्बन्धिगुणवत्त्वलक्षणमसमन्तसर्वाक्षगुणत्वं जिनवर्धमानस्य न सम्भवति तथापि मतिज्ञानादयो ज्ञानादिभेदा नात्मनो गुणाः "सहभाविनो गुणाः, क्रमभाविनः पर्यायाः"
[ ] इति सूत्रबलात् सहभाविन एव गुणत्वेन क्रमभाविनां मतिज्ञानादीनां गुणत्वाभावात् किं तु निर्विशेषिता ज्ञानादय एव गुणाः, जैनमते स्वतोऽनुवृत्तिस्वभावा ज्ञानादय एव सामान्यमिति तद्रूपेण सर्वेषामात्मना गुणा

जिनवर्धमाने वर्तन्त इति ज्ञानादीनां सहभावित्वनिबन्धना ये च प्रकारास्तैः सर्वैरपि कर्मावरणविगमद्वारायातां जिने ज्ञानादय सन्ति, ते च प्रकारा सर्वविषयावभासकत्वादय एव न तु मतिज्ञानत्वादय इति यदि च सामान्यरूपेणान्यात्मगुणानां तत्र सद्भावोऽपि विशेषरूपेण स्वतोऽत्यानुवृत्तिरूपेणेन न सद्भाव, सोऽपि च गुणेषु सर्वदाऽवतिष्ठमान सहभावित्वनिबन्धन एवेति विभाव्यते तथा सर्वात्मवृत्तिगुणवृत्तिसामान्याश्रयगुणानां सर्वप्रकारेण सहभावित्वप्रयोजकताधारत्वमेव समन्तसर्वाक्षगुणत्वम् तच्च जिने समस्तीति अथवा समन्तत सर्वे अक्षगुणा यस्य स समन्तसर्वाक्षगुणस्तम्, तथा च जिनवर्धमानस्यैवात्मन सर्वे ज्ञानादयो गुणा अनावृता सन्त समन्तात्जिनवर्धमाने वर्तन्त इति समन्तसर्वाक्षगुणत्वमुपपन्नम् अक्षशब्दात्मना सर्वाक्षगुणा आवृतत्वाच्च समन्तत इति भवत्यतद्वृत्तदृष्टत्वनिमित्तत्वादुपास्यत्वप्रयोजकमिति।

पुन कीदृशम्? निरक्षमिति-इन्द्रियवाचकमक्षपदमत्राक्षव्यापारपरम्, तथा चाक्षव्यापाररहितमित्यर्थ, तेन संसारे विहरमाणस्य जिनवर्धमानस्य चक्षुरादीन्द्रियसद्भावेऽपि न क्षति, तदानीं सर्वेन्द्रियविषयाणां रूपरसादीनां केवलालोकेनैवालोकयतस्तस्य प्रयोजनाभावेन चक्षुरादीन्द्रियव्यापाराभावात्, मुक्तौ तु निरक्षत्वमिन्द्रियरहितत्वमेव, अनन्तराभिहितधर्मसमन्वितस्य तस्योत्कृष्टप्रयोजकत्वम्, अक्षपदस्येन्द्रियव्यापाररहितत्वस्येन्द्रियरहितत्वस्य वा घट-पटाद्यसाधारणत्वेऽप्युपासनाविधायकतयोपास्यत्वप्रयोजकत्वे न भवेत्, सर्वाक्षगुणस्य निरक्षत्वमायाततो विरुद्धमाभासते विरोधपरिहारश्चात्मादेरक्षशब्दस्य इन्द्रियपरत्वेन च भवत्येवेति विरोधाभासालङ्कारोऽत्र, "आभासत्वे विरोधस्य विरोधाभास उच्यते" [ ] इति वचनात्; अथवा रक्ष्यत इति रक्ष निरतम्-अतिशयेन रक्षो निरक्षस्तम् यो हि यादृशस्वभावे वर्तते तस्योत्तरकाले तत्स्वभावावस्थानं तत्स्वभावाप्रच्युत्या यद् भवति तद् रक्षेति निगद्यते, जिनवर्धमानो जिनवर्धमानस्वभावो यदा जातस्तदारभ्योत्तरकालमखिलमपि स स्वभावस्तत्र वर्तत इति तत्स्वभावस्याप्रच्युत्याऽवस्थानलक्षणा रक्षा नितरां समस्ति, अन्यप्रयुक्ता तु रक्षा प्रयोजकस्यापगमे विनश्यतीति न सा नितरां रक्षा जिनवर्धमानस्तु स्वकारणादविनश्वरतयास्वभाव एव जातो न तस्य स्वभावस्यापगमाशङ्काऽपि स्वस्वरूपाभिरक्षणादिति निरक्षत्वमुपपद्यते जिनवर्धमानस्य, उक्तस्वरूप च निरक्षत्वं न घट-पटादिसाधारणमिति भवत्युपास्यत्वप्रयोजकम्।

पुन कीदृशम् ? स्वयम्प्रभ स्वयम्-आत्मनैव प्रकर्षेण भातीति स्वयम्प्रभ स्तम् एवकारोपादानात् स्वभाने दीपान्तरादिप्रकाशनिरपेक्षस्यापि प्रदीपादे स्वातिरिक्तचक्षुरादीन्द्रियप्रमात्रन्तरपेक्षणाच स्वयम्प्रभत्वम्, अस्मदादीनामात्मनामपि जाग्रत्स्वप्नसुषुप्त्यवस्थासु स्वात्मनैव भानत्वेऽपि न प्रकर्षेणानावृतस्वरूपेण भातत्वमिति भवत्येतज्जिनवर्धमानस्योत्कर्षाधायकमिति ।

तत् किं स्वकीयज्ञानलक्षणप्रभया स्वस्वरूपमेवावभासयति ? उत पदार्थान्तरमप्यवभासयतीत्याकाङ्क्षायामाह सर्वगतावभासमिति सर्वगत-सर्व पदार्थवृत्ति अवभास-निरावरणज्ञानविषयता यस्य स सर्वगतावभासस्तम्, निरावरणेत्युपादानादस्मदादीनामात्मनां सर्वगतावभासत्वप्रसङ्ग, अस्मदादीनामात्मनामप्युपयोगलक्षणत्वेनोपयोगस्य सर्वस्य सर्वविषयकत्वं स्वभावत एव, किन्तु कर्मावरणाच्छादितत्वान्नसर्वविषयत्वेनावभासव्यवहारो न भवति, तथा सर्वविषयका श्रुतज्ञानत्वेऽपि सर्वज्ञत्वव्यवहार, क्षायोपशमिकत्वादिज्ञानविषयत्वेन घटोऽवभासत इति व्यवहारो यद्यपि भवति तथापि सर्वथा घटोऽवभासत इति न भवत्येव एव च सर्वप्रकारेण सर्वपदार्थवृत्तिविषयतानिरूपकनिरावरणज्ञानवत्त्व सर्वगतावभासस्य निजवर्धमानस्योपास्यत्वप्रयोजकप्रकृष्टत्वगमकत्वमुपपन्नम् निरावरणस्यापि ज्ञानस्य नियमितपदार्थविषयकत्वमेव न सर्वविषयकत्वमिति न शङ्कनीयम्,

'ज्ञो ज्ञेये कथमज्ञ स्यादसति प्रतिबन्धरि ? ।
दाह्येऽग्निर्दाहको न स्यात् कथमप्रतिबन्धक ॥ ८ ॥ [ ]

इति वचनात्, यथा दाहकस्वभावस्य वह्नेर्दाह्यस्वभावतृणादिसन्निधाने दाहप्रतिबन्धकमण्याद्यसमवधाने च दाहकत्वमेव स्वभावस्तृणादीना चादाहकत्वम् तथा जानातीति ज्ञ, तत्स्वभाव आत्मा, ज्ञायत-ज्ञानविषया भवतीति ज्ञेय तस्मिन् पदार्थे, यत्र कुत्रापि देशे यदा कदापि काले वर्तमाने सति, अवभासप्रतिबन्धककर्मावरणविगमे च कथम् ?-न कथञ्चित्, ज्ञेयत्वमात्रपदार्थमात्रविषयकज्ञानरहितो भवेदित्युक्तवचनात् ज्ञानस्य सर्वविषयत्वस्वभावत्वेऽपि निश्शेषतआवरणकर्मक्षयासम्भवात् प्रतिबन्धके विद्यमाने सर्वविषयावभासत्व न सम्भवतीति न शङ्कनीयम्, 'यदुत्कर्ष यदपकर्षस्तदतिशायिनोत्कर्षेणापकर्षे तदत्यन्तापकर्ष' इति व्याप्तेर्येद्वैरुत्कर्षातिशयं जलस्यात्यन्तापकर्षदर्शनाज्ज्ञानोत्कर्ष दोषावरणापकर्षस्य दर्शनेन ज्ञानात्यन्तोत्कर्षे पुरुषविशेषे दोषावरणात्यन्तापकर्षस्य सम्भवात्, तदुक्तम्—

"दोषाऽऽवरणयोर्हानिर्निःशेषाऽस्त्यतिशायनात् ।
यथा क्वचित् स्वहेतुभ्यो बहिरन्तर्मलक्षय ॥ ४ ॥" [ ]

अत्र दोषाऽऽवरणहानितरतमभाव क्वचिद् विश्रान्तः, तरतमभावत्वात्, यो यत्तरतमभाव स क्वचिद् विश्रान्त, यथाऽणुपरिमाणतरतमभाव परमाणौ महत्परिमाणतरतमभावो गगनादौ वा, तरतमभावश्च ज्ञाने दोषाऽऽवरणहानौ चेति, तस्मादस्ति तरतमभावविश्रान्त्याश्रयो दोषावरणहानिप्रकर्षातिशयश्चेति यत्तरतमभावविश्रान्त्याश्रयदोषावरणहानिमान् तथाभूतज्ञानवांश्च स भगवान् आप्तस्तम् सर्वज्ञनिराकरणपरमीमांसकमतखण्डन निमग्न सम्मतितर्कादाविति।

पुन कीदृशम्? अतीतसङ्ख्यानम् अतीतम्-अतिक्रान्त सङ्ख्यान गणितशास्त्रं ज्योतिश्शास्त्र च येन सोऽतीतसङ्ख्यानस्तम्, अमुकतिथि-नक्षत्र करण योगाद्याकलितमुहूर्ते जात पुमानीदृशगुणसम्पन्नो भवतीत्यावेदके ज्योतिश्शास्त्र यस्मिन् पुरुषधौरेये जिनवर्धमाने वचनातिक्रान्तानन्तगुणविशेषशालितत्वाद गमयितु न प्रगल्भत, वचनविन्यासन्दर्भमयस्य ज्योतिःशास्त्रस्यानभिधेयगुणप्रतिपादनासामर्थ्यादिति युक्तमेवाऽतीतसङ्ख्यानत्वम्, अथवा "हर प्रसङ्ख्यानपरो बभूव [कु०सं०स०३] इत्यत्र प्रोपसर्गपूर्वकस्य सङ्ख्यानशब्दस्य योगविशेषात्मकध्यान वाचकत्वेन सङ्ख्यानशब्दोऽपि ज्ञानात्मयोगवाचक इति अतीत-संक्रान्त्य बहिर्भूत निरालक्षण सङ्ख्यान यस्य कृतकृत्यस्य भगवत सोऽतीतसङ्ख्यानस्तम्, अथवा अतीतम्-उल्लङ्घित सङ्ख्यानं-निरुद्धयोगात्मक येन सोऽतीतसङ्ख्यानस्तम्, सर्वप्रकारेण योगिनोऽपि ध्यानाविषयत्व भवत्युक्तपर्यायकम्।

पुन कीदृशम्? अनन्तकल्पम् अनन्तस्य-विष्णो, कल्पं-सदृशम्, अथवा अनन्ता -अनन्तसङ्ख्यक, कल्प तत्त्वप्रतिपादक पक्षो यत्र सोऽनन्तकल्पस्तम्, शैवानामयं शिव इति वैष्णवानामयं विष्णुरिति, पौराणिकानामय पितामह इति बौद्धानामयं बुद्ध इति, मीमांसकानामिदं कर्मेति, नैयायिकानामय जगत् कर्तेति, जैनानामयमर्हन्नित्येवमनन्तसङ्ख्यकपक्षविषयत्वमनन्तकल्पत्वमुपासनाभेदनिबन्धनं युज्यत इति; अथवा ब्रह्मणो यावत्सृष्ट्यधिकरणकाल कल्प इति पदं परिभाषित, सोऽनन्तो यस्य सोऽनन्तकल्पस्तम्, अनन्तकल्पावच्छिन्नस्थायित्वमनन्तकल्पत्वमुपास्यत्वप्रयोजक युज्यत इति।

पुन कीदृशम्? अचिन्त्यमाहात्म्यम् अचिन्त्यम्-इदमित्थमस्येत्येव चिन्तयितु विचारयितुमशक्य माहात्म्य यस्य सोऽचिन्त्यमाहात्म्यस्तम्, देवागम-

नभोयानचामरादिविभूतीनां साक्षात् तद्विहरणसमये प्रत्यक्षत उपलभ्यमानानां मध्यद्वा चागमगम्यानां सद्भावेऽपि चिन्तन विशेषानामनन्तत्वोऽशक्यमेवेति भाव]

पुन कीदृशम् ? अलोकलोकम् अलोक-धर्माधर्मास्तिकायानवच्छिन्नाकाश, लोकयति-प्रकाशयतीत्यलोकलोकस्तम् अथवा लोकै -रथ्यापुरुषसाधारणजनै, लोक्यते-प्रत्यक्षविषयीक्रियत इति लोकलोक, न लोकलोकोऽलोकलोक - अस्मदादिप्रत्यक्षागोचरस्तम् यद्वा लोक-प्रत्यक्षप्रमाणमात्रगम्य, लोकयति-पश्यतीति लोकलोकश्चार्वाक स्वर्गापवर्गाद्यपलापी एवंभूतो यो न भवति सोऽलोकलोक -स्वर्गापवर्गादिलिप्रत्यक्षाविषयाभ्युपगन्ता, तम् अथवा अलोक-अस्मदादिप्रत्यक्षाविषय लोकयति-साक्षात्करोतीत्यलोकलोकस्तम् अथवा, अलोकलोकौ-धर्मास्तिकायाऽधर्मास्तिकायानवच्छिन्नाकाश तद्भिन्नाकाशास्य स इत्यलोकलोक , धर्मादित्वाद्च् प्रत्यय तम्, अलोक-लोकमध्ये स्थित चास्य तद्विषयकप्रत्यक्षवत्त्वेन । उपेन्द्रवज्रावृत्तम् ॥ २ ॥

पुन किम्भूतम् ? कुहेतु तर्कोपरतप्रपञ्चसद्भावशुद्धाप्रतिवादवाद कुत्सितौ यौ हेतु-तर्कौ हेतो साध्याविनाभाव-पक्षधर्मतोभयशून्यत्व कुत्सितत्वम्, यत्र पक्षधर्मता विद्यते साध्याविनाभावश्च नास्ति तत्र साध्याविनाभाव राहित्यप्रयोज्य निरक्तोभयशून्यत्वम्, यत्र साध्याविनाभावो विद्यते पक्षधर्मता च नास्ति तत्र पक्षधर्मताराहित्यप्रयोज्य निरुक्तोभयशून्यत्वम्, तर्कस्य-जैनमते साध्य हेत्वविनाभावग्राहकोहाख्यप्रमाणरूपस्य सर्वोपसंहारेण शब्दार्थयोर्वाच्यवाचक भावसम्बन्धग्राहकस्य वा, साध्याविनाभावविरहिणि साध्याविनाभावग्राहित्व, तद्वाचके शब्दे तदर्थवाचकत्वग्राहकत्व तद्वाच्येऽर्थे तच्छब्दवाच्यत्वग्राहकत्वस्य वा कुत्सितत्वम्, न्यायमते व्यभिचारशङ्कानिवर्तकत्वेन व्याप्तिग्रहोपयोगी तर्कों व्यापकाभाववत्तया निर्णीते धर्मिणि व्याप्यारोपेण व्यापकारोपलक्षण, यथा क्वचिद् वह्निविरहवत्यपि धूमो भविष्यतीति व्यभिचारशङ्कानिवर्तको धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति तस्य कुत्सितत्वमिष्टापादनरूप त्वमापाद्याऽऽपादकयोर्व्याप्त्यभावश्च विपर्ययपरिशोधकश्च तर्क आत्माश्रयाऽन्योन्याश्रय-चक्रका ऽनवस्था-लाघव गौरवान्येषामपि कुत्सितत्वमिष्टापादनादि रूपत्वम्, ताभ्यां कुहेतु-तर्काभ्यामुपरत कुहेतुतर्कोपदर्शनरहित इति यावत्, प्रपञ्चस्य-जगतो य सद्भाव -वास्तविकस्वरूप तेन शुद्ध -विपर्यासशुद्धिरहित, अप्रतिवाद -न विद्यते प्रतिघातको वाद -राद्धान्तो यस्य सोऽप्रतिवाद ,कुहेतुतर्का

परतः प्रपञ्चसद्भावसुदृढप्रतिवादो वादो यस्य स कुहेतु तर्कोपरतप्रपञ्चसद्भावसुदृढप्रतिवाद्यवाद, तम्, यद्वा स्याद्वादसिद्धान्तो यत्र न कुहेतु-तर्कोपदर्शनम्, यश्च प्रपञ्चस्य-जगतः सद्भावावेदकत्वात्सुदृढ यद्विषयबाधको नापरो राद्धान्त इति।

पुनः कीदृशम्? सच्छासनवर्धमानं सत्-प्रमाणाबाध्यार्थप्रतिपादकत्वात् समीचीनम्, सतां-वा पदार्थानाम्, शास्यते प्रतिपाद्यतेऽनेनेति शासनम्, समीचीन-सम्प्रदायप्रवर्तको वाऽऽगमः, तेन वर्द्धमानं-तीर्थान्तरप्रणेत्रपेक्षया वृद्धिमुपगच्छन्तम्।

पुनः कीदृशम्? यतीन्द्रं यमनियमादिव्रता यतीना-मुनीनाम् इन्द्र-राजा तम्; एवम्भूतं जिनवर्धमानं जिनश्चासौ वर्धमानश्च जिनवर्धमानस्तम्, रागद्वेषादिभावशत्रुजेतृत्वाज्जिन अव-समन्तात्, ऋद्धं परमातिशयप्राप्तम्, मानं-केवलज्ञानं यस्यासौ वर्धमानः, ' वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः " इति वचनादकारलोपात् वर्धमान इति, अनेन जिनसमुच्चयो विशेष्यतयोपादानात् स्वयम्भुवमित्यादीनि विशेषणानि सर्वाण्यपि जिनमात्रसङ्गतानि, किन्तु सन्निहितोपकारकत्वात् वर्धमानमन्तिमतीर्थङ्करे शासनायकत्वविशेषा वतसेक्ष्वाकुवंशीयसिद्धार्थनरेन्द्रपुत्रे जम्बूद्वीपे भरतवासरमतीर्थङ्करवर्धमान एव 'जिनवर्धमान' इत्यनेन ग्राह्यः ' सिद्धार्थनरेन्द्रकुलदीप '[११] इत्येवं तत्त्वार्थकारिकायामसौ निर्दिष्टः, तत्र "वर्धते हीद कोशाद्यभिवृद्ध्या वर्धमान इत्यतो दीप ' इत्यनेन टीकावचनेन गर्भजन्मकालादारभ्य कोशाद्यभिवृद्धिरिति वर्धमानसंज्ञाप्रवृत्तिरिति ॥ जिनवर्धमानम्, प्रणम्य स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारलक्षणं प्रणामं कृत्वा, अमुं स्तोष्ये सद्वृत्तिगुणातिशयप्रकटनलक्षणस्तुतिविषयकमविष्यत्कृतिमानहं सिद्धसेनदिवाकर इत्यर्थः । प्रथम-तृतीयपादयो रुपेन्द्रवज्रात्व, द्वितीय-चतुर्थपादयोरिन्द्रवज्रात्वमित्युभयमेलनादुपजातिवृत्तमिदमिति ॥ २ ॥

स्तुतिकारो वर्धमानस्तुतिकरणप्रवृत्तौ हेत्वन्तरनिषेधपुरस्सरमसाधारणहेतुमुपदर्शयति—

न काव्यशक्तेर्न परस्परेर्ष्यया,

न वीरकीर्तिप्रतिबोधनेच्छया ।

न केवलं श्राद्धतयैव नूयसे,
गुणज्ञपूज्योऽसि यतोऽयमादरः ॥४॥ [वंशस्थविलम्]

न काव्यशक्तेरिति-अस्य नूयसे इत्यनेनान्वयः,

"शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ १० ॥" [काव्यप्रकाशे १,३]

इति वचनात् काव्योत्पत्तौ शक्ति निपुणता अभ्यासानां त्रयाणां समुदितानामेव हेतुत्वं, न त्वेकैकस्येति काव्यशक्तेरित्यनेन काव्यशक्ति-काव्यनिपुणता-काव्याभ्यासेभ्य इति गृह्यते काव्यशक्त्यादिकं मयि वर्तते, अतस्तदुपयोगो यत्र कुत्रापि विषये मया प्रकटनीय इत्यभिसन्धिमता मया काव्यशक्त्यादिवशात् हे भगवन्! त्वं न नूयसे स्तूयसे इत्यर्थः। न परस्परेर्ष्यया नूयसे अन्यतमो मत्तो न्यूनो वा भगवन्तं स्तौति, कथमहं न स्तवीमि तम्, अहमस्तस्ता वाऽधिकप्रतिभादिगुणशाली स्वेतमन्योऽन्येर्ष्यया मया न स्तूयसे यथा काव्यशक्तिमान् स्तुतो न यथास्थितस्य गुणख्यापनं तथेर्ष्याज्ञानिनस्तुवतीत्यर्थः। न धीरकीर्तिप्रतिबोधनेच्छया कीर्त्यन्तरीय मनि धीरस्य-अपश्चिमतीर्थकृतो भगवतो या त्रिभुवनव्यापिनी कीर्तिस्तस्या यत् प्रतिबोधन-सम्यगवगमनं तदिच्छया-तत्कामनया न स्तूयसे, धीर[1] इति सम्बोधनं वा, तत्र तदाने द्वयम्, अथवा स्वस्य काव्यकरण कुशलतादिविषयकस्याकस्यापि प्रख्यातिविषयकबोधेच्छयेत्यर्थ, एतत्स्तुतिमन्तरेणापि त्रिभुवनव्यापिन्या भगवान् धीरत्वकीर्तिरस्त्येव जानात्येवेति तदिच्छया स्तुतिना मन्दनाथ विदुपामित्याशय । न केवल श्राद्धतयैव नूयसे अनया स्तुत्या भगवद्गुणानिनायानयतिभवतु वा मा वा केवल-किन्तु भगवद्विषयिणी भक्ति - श्रद्धा समस्ति तद्वशया स्तूयसे, स्वश्रद्धाप्रकटनफलमिदं भवत्स्तुतिरस्माकमि त्यपि नेति यावत्, एतास्मी स्तुतिगुणानिनायविकल्पस्यापि श्रद्धान्धपुरुषकृताऽज्ञान विजृम्भितेति नोपादेया विदुषामित्याकूतम्। यतः यस्मात्, गुणज्ञपूज्योऽसि गुणज्ञानां सुरेन्द्रादीनामर्थनीयस्त्वमसि, गुणज्ञा गुणातिशयवत्तया भवन्तं ज्ञात्वैव भवन्तं पूजयन्ति यदि भवान् गुणातिशयवान् स्यात् गुणज्ञा भवन्तं पूजयेयुरिति गुणातिशयवति त्वयि, अयं स्तुतिविषयक, आदर प्रयत्नो ममत्यर्थ। 'वदन्ति वंशस्थविलं जतौ जरौ' इति लक्षणलक्षितत्वाद् वंशस्थविलवृत्त मिदम्, एवमग्रेऽपि ॥ ४ ॥

भगवत्स्तुतिविषयकप्रयत्नलक्षणादरस्यावश्यविधेयत्वमुपदर्शयति–

परस्पराक्षेपविलुप्तचेतसः,
स्ववादपूर्वापरमूढनिश्चयान् ।
समीक्ष्य तत्त्वोत्पथिकान् कुवादिनः,
कथं पुमान् स्याच्छिथिलादरस्त्वयि ? ॥ ५ ॥

परस्पराक्षेपेति । कुवादिनः समीक्ष्य पुमान् त्वयि शिथिलादरः कथं स्यादित्यन्वयः, कुवादिनः कुत्सितैकान्तवादप्रचारोद्यतान् परवादिनः, समीक्ष्य सम्यग् ज्ञात्वा पुमान् प्रमाता पुरुषः त्वयि स्याद्वादवादान्तोपदेशके जिने शिथिलादरः गुणस्तुत्यादौ शिथिलप्रयत्नः, कथं स्यात् ? न कथञ्चित् स्यात्, सततं त्वद्गुणगानादिप्रयत्नवानेव भवतीत्यर्थः । कीदृशान् कुवादिनः ? परस्पराक्षेपविलुप्तचेतसः अन्योऽन्यं प्रति य आक्षेपः–प्रश्नः, एकान्तनित्यवादिन एकान्तानित्यवादिनं प्रति, एकान्तानित्यवादिन एकान्तनित्यवादिनं प्रति प्रश्नः, तेन विलुप्तं–विशेषेण स्वपक्षस्थापनकुण्ठितम्, चेतः–अन्तःकरणं येषां ते परस्पराक्षेपविलुप्तचेतसस्तान्, परस्पराक्षेपपर्यवसितत्वात् स्वपक्षस्थापनसामर्थ्यविकलचित्तानिति यावत् । अत एव स्ववादपूर्वापरमूढनिश्चयान् स्वस्य–निजस्य यो वादः–एकान्तनित्यत्वविषयक एकान्तानित्यत्वविषयको वा राद्धान्तः, तस्य यः पूर्वो भागः–पूर्वमुक्तिप्रकारः प्रश्नप्रतिविधानादिलक्षणः, पश्चात् परो भागः–पूर्वप्रदर्शितप्रकारोपपादनरूपस्तद्विलक्षणप्रकारोपदर्शनादिरूपो वा तयोर्मूढः–तदवधारणासमर्थः निश्चयः–निर्णयो येषां ते तथा तान्, स्ववादे पूर्वमिदमुक्तमुत्तरत्र चेदमुक्तमिति पूर्वापरपरामर्शविकलतया स्वोक्तिविरुद्धभाषणतया स्वोक्त्यैव पराहतानिति यावत् । तथा तत्त्वोत्पथिकान् तत्त्वोक्तमार्गगामिनः ईदृशान् कुवादिनामुपदेशतो दूरे तत्त्वार्थाधिगतिः प्रत्युत सन्मार्गप्रच्यवादनन्तभवभ्रमणमेव भवेदतस्त्वय्येव निरन्तरादरः पुरुष इत्यर्थः ॥ ५ ॥

परैकान्तवादिभिरेकीभूय त्वद्वचसि उद्भाविता दोषा अपि सद्विचारमुपनीता गुणा एवेति दर्शयति—

वदन्ति यानेव गुणान्धचेतसः, समेत्य दोषान् किल ते स्वविद्विषः ।
त एव विज्ञानपथागताः सतां, त्वदीयसूक्तप्रतिपत्तिहेतवः ॥ ६ ॥

वदन्तीति । गुणान्धचेतसः स्वविद्विषः किल समेत्य ये यानेव दोषान्

धदन्ति त एव विज्ञानपथागता सता त्वदीयसूक्तप्रतिपत्तिहेतव इत्यन्वयः । तत्र वचनगुणेऽर्थ-मर्यादाऽऽकृन चेतो-मनो येषा ते गुणाच्चेतस, त्वद्वचन गुणज्ञानविकला इत्यर्थ । अत एव स्वविद्विष स्वात्मानमर विद्विषन्त निज वचनमन्तरेण यथार्थमम्बरपज्ञानामप्रवेनाना मानमेवात्मानमवगच्छन्तस्ते आत्मान नरक पातयन्तीति भवन्ति स्वविद्विष । किलेति सम्भावनायाम् । हे तत्र मते, अथवा ते एकान्तवादिन । समेत्य एकीभूय । यानेव दोषान् निरोध-सङ्कर-व्यतिकर-संशया ऽनवस्थादीन् । घदन्ति कथयन्ति । त एव दोषा विज्ञानपथागता विचारमार्गापनीता सम्यग्विचारिता सन्त, सता तत्त्वातत्त्वविवेककुशलानाम्, त्वदीयसूक्तस्य-त्व मुखाम्भोजनिर्गतस्याद्वादामृतका व्यस्य या प्रतिपत्ति -ज्ञान तस्य हेतवो भवन्ति, अपेक्षाभेदेन विरोधादिदोषाणा परिहारोपपत्ते सर्वथाविरोधादेरभावात् कथञ्चिद्विरोधादरिष्टत्वादित्यर्थ ॥ ६ ॥

कृतार्थता त्वय्येव परिनिष्ठितेति [कृपास्वरूप त्वयैव परिज्ञातमिति] त्वैया न्योपरि कृपा श्लाघनीया नान्येषामित्याह—

कृपा वहन्त कृपणेषु जन्तुषु,
समासदानेष्वपि मुक्तचेतस ।
त्वदीयमप्राप्य कृतार्थकौशल,
स्वत कृपा सञ्जनयन्त्यमेधस ॥ ७ ॥

कृपामिति । कृपणेषु जन्तुषु कृपा वहन्त समासदानेष्वपि मुक्त-चेतसोऽमेधस, त्वदीय कृतार्थकौशलमप्राप्य स्वत कृपा सञ्जनयन्तीत्यन्वय । अमेधस मेधारहिता पुरुषा सौगतादय, कृपणेषु आतदारिद्र्येषु कृपापात्रेषु, जन्तुषु प्राणिषु कृपा तद्रक्षणविषया दयाम्, वहन्तो धारयन्त, समास दानेष्वपि मुक्तचेतस स्वमासदानेनाप्यन्यरक्षण भवत्वित्येवचित्तव्यापारा, ह धार ! त्वदीय त्वत्सम्बन्धि, कृतार्थकौशल कृताय-निष्पन्नप्रयोजन यत् कौशल-चातुर्यम्, यद्वा कृतार्थ ! हे कृतकृत्य ! भगवन् ! कौशल सकल विषयक चातुर्यम्, यद्वा प्रकृते विशेषत उपयुक्त 'कृपार्थकौशल' इति पाठो यदि कल्प्येत तदा दयाशब्दार्थकरणचातुर्यमिति तदर्थ, 'अनिष्टाननुबन्धिनी ~ । दया इति दयाशब्दार्थ, दयास्वरूपमिति भाव, तत्र

धातुर्येमिति, अप्राप्य अलब्ध्वा स्वत स्वस्मिन्, कृपाम् अन्येषां दयाम्, सञ्जनयन्ति उत्पादयन्ति, तन्निमित्तकस्वमांसप्रदानेन यथावद् तद्रक्षण न जातमेव केवलं तत्र तस्य निमित्ततयाऽपायोत्पत्ति, स्वस्यापि च निषिद्धस्वमांस दानाचरणजन्यप्रत्यवायोत्पत्तिश्चेति तच्छब्दात्पुरुषेणैव ज्ञानिना कृपोपनायत इति, अत एव शिशिरनाम्नो राज —

"न कपोतकपोतकं तत स्पृशतु श्येन ! मनागपि स्पृहा।
इदमद्य मया समर्पितं, भवते चारुतरं कलेवरम्॥ ११॥" [र ग आ १]

इति वचनप्रतिपादित कपोतरक्षार्थं स्वहस्तरक्तेनोत्कृत्य स्वशरीरमांस प्रदान श्येनपत्रिण न समीचीनम्, इत्यावेदितम्॥ ७॥

एव स्वस्य येन केनचिदुपायेन काकतालीयन्यायेन क्लेशविनाशमनुभूय तदु पायेनैव सम्भावितानितुल्यप्रभावप्रभाविनकरुणामकरन्दतरुकृपाविम नाकल्पप्रति पादकप्रमाणापेतवचनाडम्बरेण भवव्याधिविनाशकभवदीयवचनामृतौषधनिन्दा परायणो जन स्वयमपि काम क्रोधादिलक्षणभवगदपीडितो न शान्तिमाप्नोतीति भवत्त्विजनोपदेश परित्यज्य भवदुपदेशमेव भवव्याधिविनाशाय शृण्वन्तु शान्त्यभिलाषुका इत्युपदिशति—

जनोऽयमन्यं करुणामयैरपि,
स्वनिष्ठितक्लेशविनाशकाहलैः।
निकृत्तयस्त्वद्वचनामृतौषधं,
न शान्तिमाप्नोति भवार्त्तिविक्लवः॥ ८॥

जनोऽयमिति। अयमन्यो जनो भवार्त्तिविक्लवस्त्वद्वचनामृतौषधं करुणामयैरपि स्वनिष्ठितक्लेशविनाशकाहलैर्विकृन्तयन् न शान्तिमाप्नोतीत्यन्वय। अय रथ्यापुरःप्रदर्शितस्ततो दृश्यमान, अन्य कल्पनाधायातशयविकलत्वाद् भव क्लिश, जन भवभ्रमणजन्यक्लेशादप्रयोजनकनिमान् भवार्त्तिविक्लव भवसम्बन्धिपीडापारलुत्तचेता, हे वीर! त्वद्वचनरूप यत् परमानन्दप्राप्त्युपाय ज्ञानादिसाधनत्वादमृत तदेवौषध भवव्याध्यपहारप्रत्यलम्, करुणात्मकैरपि 'अहो मासोपवासादङ्क्लेशानन्तरायै क्लेशपरिहाणिमुपदर्शयन् जिनोऽक रण, भोजनादीनि कर्माणि कुर्वन्नेवाहमिव क्लेशविमुक्तो भविष्यति जन, किमिति मुधा क्रियते?' इत्येव करुणात्मकैरपि, स्वनिष्ठितक्लेशविनाशकाहलैः स्वस्मिन्

स्वस्य वा निष्ठां-श्रद्धामित -प्राप्तो य क्षुद्रविनाशस्तस्य क्वाहते -युक्तिभि वचनोत्तरै, विघुत्सयन् निन्दयन्, न शान्तिम्, आप्नोति प्राप्नोति, भवत्‌ या भवार्तिविक्लव इति हेतु, यत इत्थ स्वदुज्जनाशनोपथ विघुत्सयन् असेव मानो भवार्तिविक्लवो भवतीति ॥ ८ ॥

अन्यताबिकमतारणया भवदुपदर्शितमार्गप्रतिकूल गच्छन् जनो मनुष्य जन्मकार्याकरणादुत्तरभवेऽपि पूर्वभवीयसंस्कारप्राबल्यतो जन्मकार्याकरणात् सुचिरमनात एवेत्युपदिशति—

> प्रपञ्चितक्षुल्लकतर्कशासनै,
> परप्रणेयाल्पमतिर्भवासनै ।
> त्वदीयसन्मार्गविलोमचेष्टित,
> कथ नु न स्यात् सुचिर जनोऽजन ? ॥ ९ ॥

प्रपञ्चितेति । परप्रणेयाल्पमतिर्जनो भवासनै प्रपञ्चितक्षुल्लकतर्कशासनै त्वदीयसन्मार्गविलोमचेष्टित सन् कथ नु सुचिरमजनो न स्यादित्यन्वय । परप्रणेयाल्पमति परेण प्रणया-नीयमाना, अल्पा-अल्पविषयिणी मतिर्यस्य स परप्रणेयाल्पमति, परावबोध्यमानमात्रविषयकबुद्धिरित्यर्थ । जन पुरुष । भवासनै भव -ससार, आसन-सुखावस्थानास्पद येषा ते भवासनास्तै । प्रपञ्चितक्षुल्लकतर्कशासनै -प्रपञ्चितानि-स्वयनिर्मितानि, यानि क्षुल्लकतर्क शासनानि-तर्कतयाऽऽपाततो भासमानकोमलप्रतिपादकशास्त्राणि तै -तद्द्वारे त्यर्थ । त्वदीयसन्मार्गविलोमचेष्टित -हे वीर ! त्वदुपदिष्टो य समीचीनो मार्ग, तद्विलोमचेष्टित -तत्प्रतिकूलक्रिय, उन्मार्गगामीति यावत् एवम्भूतो जन नु इति वितर्के, सुचिर चिरकाल यावत्, अजन सुजनभिन्न, वस्तुत स्वजनिकार्यासम्पादकत्वादजात एव कथ न स्यात् ? अपि तु सुचिरमनात एवेत्यर्थ ॥ ९ ॥

अपराधरहितानप्यस्मान् स्याद्वादिनो ऽन्यत्मा एकान्तवादिनस्त्वय्यप्रतिकूलवादि-त्वाद् दहन्तीति धिगतानित्युपदर्शति—

> परस्पर क्षुद्रजन प्रतीपगा
> निहन्ति दण्डेन युनक्ति वा नरा ।

निरागसस्त्वत्प्रतिकूलवादिनो,
दहन्त्यमुत्रेह च जाल्मवादिनः ॥१०॥

परस्परमिति । क्षुद्रजनाः परस्परं प्रतीपगान् इहैव दण्डैः युनक्ति वा, नवा युनक्ति त्वत्प्रतिकूलवादिनो जाल्मवादिनो निरागसः इहामुत्र च दहन्तीत्यन्वयः। क्षुद्रजनाः क्षुद्रस्वभावो रथ्यापुरुषादिः, परस्परं प्रतीपगान् अन्योऽन्यस्वपक्षविरुद्धपक्षावलम्बिनः, इहैव अस्मिन्नेव लोके, दण्डेन प्रतिघातकयष्ट्यादिना, युनक्ति वा सम्बन्धयति वा, नवा युनक्ति नवा दण्डेन सम्बन्धयति, चिरकालिकक्रोधादिदोषाविर्भावे तदुपशान्तये प्रतीपगानिहैव दण्डादिना घातयति, नाविर्भूतस्याप्यचिरकालिकस्य क्रोधादेः स्वयमेवोपशान्तौ न घातयत्यपीत्यर्थः। हे वीर! त्वत्प्रतिकूलवादिनः त्वदभ्युपगतस्याद्वादविरुद्धैकान्तवादिनः, जाल्मवादिनः जाल्मा मूर्खास्ते च वादिनो जाल्मवादिनः, निरागसः अपराधरहितान् भवच्छिष्यानस्मान्, इह अस्मिन् लोके, इहैव तानजिनवचननिन्दामुपश्रुत्य क्रोधाविष्टमानसा वयं दहामहे, जिनभक्ता वयं परभवेऽपि नैनान् एव भविष्याम इति अमुत्र परलोकेऽपि दहन्ति ॥ १० ॥

सर्वं वस्त्वाविद्यकमेव, अविद्यायाः द्वे शक्ती—आवरणशक्तिर्विक्षेपशक्तिश्च, तत्र विक्षेपशक्तिनाम सर्जनशक्तिः, यत आकाशादिक्रमेण वस्तुनः सृष्टिः आवरणशक्तिर्द्विधा—असत्त्वापादिकाऽऽवरणशक्तिः सा च परोक्षज्ञानतो नश्यति तथाहि सति घटोऽस्ति वह्निरस्तीत्येवमस्तित्वेन वस्तुनः स्फुरणम्, अभानापादिकाऽऽवरणशक्तिश्च सा च प्रत्यक्षज्ञानतो नश्यति, तथाहि सति घट भाति वह्निर्भातीत्येव स्पष्टतया वस्तु प्रतिभासते, प्रत्यक्षस्थले विषयदेशेऽन्तःकरणं गत्वा विषयाकारेण परिणमति, स एव वृत्तिरुच्यतेऽन्तःकरणपरिणामः, तादृशवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यमिति गीयते अन्तःकरणावच्छिन्नचैतन्यं च प्रमातृचैतन्यम्, विषयावच्छिन्नचैतन्यं प्रमेयचैतन्यम्, उपाधीनामन्तःकरणतद्वृत्तिविषयाणामेकदेशस्थत्वादुपधेयानामपि चैतन्यानामेकदेशस्थत्वम्, तत्रश्चाभेद इति चैतन्यत्रयाणामेककोटीमात्रे प्रमेयचैतन्यस्य प्रमाणचैतन्याभेद एव प्रत्यक्षत्वम्, प्रमातृचैतन्य-प्रमेयचैतन्ययोरैक्यात् प्रमातृसत्तातिरिक्तसत्ताकत्वाभाव एव विषयस्य प्रत्यक्षत्वम्, विषयस्य स्वावच्छिन्नचैतन्ये कल्पितत्वादधिष्ठानसत्तैव कल्पितस्य सत्तेति विषयावच्छिन्नचैतन्यसत्तैव विषयस्य सत्ता, विषयावच्छिन्नचैतन्यं च

प्रमातृचैतन्याभिन्नमिति प्रमातृसत्तैव प्रमेयस्य सत्तेति प्रमातृसत्तातिरिक्तसत्ताकत्वाभावस्तत्र सुव्यवस्थित, परोक्षस्थले चान्तःकरणस्य न बहिर्निर्गमनमिति न तत्र विषयाकारान्तःकरणवृत्तिः किन्तु स्वदेशे विषयाकारा वृत्तिरिति वृत्त्यवच्छिन्नचैतन्यस्य प्रमेयावच्छिन्नचैतन्याभेदाभावान्न ज्ञानस्य प्रत्यक्षत्वम्, प्रमातृचैतन्यस्यापि विषयदेशस्थत्वाभावाच्च प्रमेयावच्छिन्नचैतन्याभेद इति विषयस्यापि प्रमातृसत्तातिरिक्तसत्ताकत्वाभावेन न तदभावलक्षणप्रत्यक्षत्वमित्येतन्मतमुपहसति—

> अविद्यया चेद् युगपद्विलक्षणं,
> क्षणादि कृत्स्नं न विलोक्यते जगत् ।
> ध्रुवं भवद्वाक्यविलोमदुर्नया
> श्चिरानुगास्तामुपगूह्य शेरते ॥ ११ ॥

अविद्यया चेदिति । समान्वयो यथाश्रुत एव । अविद्यया ब्रह्मनिष्ठया सत्त्वरजस्तमोलक्षणया मायया उपधमावृतत्वे, यदि, चेद् युगपत् समकालम्, विलक्षणं परस्परभिन्नम्, क्षणादि क्षणस्थितिकादि, कृत्स्नं समग्रम्, जगत् विश्वम्, न विलोक्यते युगपद्विलक्षणाप्यन्वयात् समकालं न प्रत्यक्षविषयो भवति, किन्तु यदा यद्विषयावच्छेदेनावरणस्य प्रतिबन्धो विनाशो वा तदा स विषयो विलोक्यत इति, हे भगवन् ! ध्रुवं निश्चितम्, सम्भेति नेयं, भवद्वाक्यविलोमदुर्नयान् भवतः–महावीरस्य, यदनेकान्ततत्त्वप्ररूपकं स्याद्वादवाक्यं तद्विलोमाः–तत्प्रतिकूलस्वभावाः ये दुर्नयाः–एकान्ताद्वैतावच्यवगाहिनयास्तान्, चिरानुगान् चिरकालात् स्वानुसरणशीलान्, तान् एकान्ताद्वैतादिवादिनमिव तया प्रसिद्धान्, उपगूह्य समन्तादालिङ्ग्य, शेरते एकान्ताद्वैतादिवादिनः शयनमनुभवन्ति, "भवद्वाक्यविलोमदुर्नया चिरानुगास्तामुपगूह्य शेरते" इति पाठान्तरे तु भवद्वाक्याद् विलोमा दुर्नया यया ते एकान्ताद्वैतादिवादिनः, चिरानुगां चिरकालात् सलग्नाम्, ताम् अद्वैतवादप्रसिद्धामविद्याम् उपगूह्य आलिङ्ग्य, शेरते शयनमनुभवन्ति, आविद्यकमखिलं नश्वरमिति मन्यमानो वादी यथेष्टमाचरन् तत्ससारो भवति न कदापि मुच्यत इति हृदयम् ॥ ११ ॥

न केवलं प्रवादिनोऽपि निश्चिततत्त्वनिश्चया अन्ते स्याद्वादतत्त्वावगमनतो मुक्ता भविष्यन्तीत्यत आह—

सम्बृद्धपत्रा अपि सच्छिखण्डिनो,
यथा न गच्छन्ति गतं गुरुत्मतः ।
सुनिश्चितज्ञेयविनिश्चयास्तथा,
न ते मतं यातुमलं प्रवादिनः ॥ १२ ॥

सम्बृद्धपत्रा अपीति । यथा सच्छिखण्डिनः सम्बृद्धपत्रा अपि गरुत्मतो गतं न गच्छन्ति तथा प्रवादिनः सुनिश्चितज्ञेयविनिश्चयास्ते मतं यातुं नालमित्यन्वयः । सच्छिखण्डिनः समीचीना मयूराः, सम्बृद्धपत्रा अपि परिपूर्णपक्षा अपि, गरुत्मतः गरुडस्य, गतं गमनं यथा न गच्छन्ति परिपूर्णाङ्गा अपि गमनसामर्थ्यसम्पन्ना अपि मयूरा गरुडगमनसमानगमना यथा न भवन्तीत्यर्थः । तथा तद्वत्, प्रवादिनः अद्वैतायेकान्तवादिनः, सुनिश्चितज्ञेयविनिश्चयाः सुष्ठु निश्चितः सुनिश्चितः, ज्ञेयस्य विनिश्चयो ज्ञेयविनिश्चयः, सुनिश्चितो ज्ञेयविनिश्चयो यैस्ते सुनिश्चितज्ञेयविनिश्चयाः, परैर्यथा ज्ञेयविनिश्चयः कृतः तथा ज्ञेयस्य विनिश्चयो यथार्थो न भवति परे त्वेवमभिमन्यन्ते—यथाऽस्माभिर्ज्ञेयविनिश्चयः कृतस्तथैव ज्ञेयविनिश्चयो नान्यथत्येव सुनिश्चितज्ञेयविनिश्चयाः, अपीत्यप्राप्यनुवृत्तेन योजनीयः, हे वीर ! ते तव मतं सप्तभङ्गयसंयोजनाकलितस्याद्वादप्रमाणराद्धोपपादितमनेकान्ततत्त्वम्, यातुं ज्ञातुम्, ये गत्यर्थास्ते ज्ञानार्था इति वचनात् ज्ञातुमिति यत्त्वन्ये यातुमिति यदुक्तं तद् दृष्टान्तदार्ष्टान्तिकयोः सादृश्याभिगमय, नालं न समर्थाः ॥ १२ ॥

न केवलं भक्त्यैव किन्तु पराविज्ञातार्थागमप्रवृत्त्यनन्तत्वेन सम्यक्तया परीक्षितत्वयि प्रसादोदयाकाङ्क्षिणः स्याद्वादिनः स्थिता इति भवत्प्रसादादचिरेणैवासरलत्रया प्रमादमपि प्यन्ति मुक्तिलक्ष्मीमित्याह—

य एष षड्जीवनिकायविस्तरः,
परैरनालीढपथस्त्वयोदितः ।
अनेन सर्वज्ञपरीक्षणक्षमा-
स्त्वयि प्रसादोदयसोत्सवाः स्थिताः ॥ १३ ॥

य एष इति । त्वया परैरनालीढपथो य एष षड्जीवनिकायविस्तर उदितः

अनेन सम्यक्परीक्षणक्षमा प्रसादोद्‌गमोत्सवास्त्वयि स्थिता इत्यन्वय । हे धीर' त्वया केवलज्ञानशालिना परै एकान्तवादिभि, अनालीढपथ अपरामृष्ट मार्गा, य एष परीक्षकजनै प्रत्यक्षीक्रियमाण, अध्ययनाऽध्यापनाभ्या प्रत्यक्ष वद् -यवक्रियमाण इति यावत्, षड्जीवनिकायविस्तर उपयोगलक्षणो जीव स च ससारि मुक्तभेदेन द्विविध, तत्र ससारी त्रस स्थावरभेदेन द्विविध, तत्र त्रसजीव -तेजो वायु द्वीन्द्रियादिभेदेन त्रिविध, त्रि चतुरिन्द्रियाद्यो द्वीन्द्रियाग्रिमेन सद्गृहीता, स्थावरजीवोऽपि पृथिव्यम्बुवनस्पतिभेदेन त्रिविध, यद्वा पृथिवीकायाऽप्काय तेजस्काय वायुकाय-वनस्पतिकाय-त्रसकायभेदेन षड्विधा जीवा, अत्र त्रसपदेन द्वीन्द्रिय त्रीन्द्रिय चतुरिन्द्रियपञ्चेन्द्रियाणा ग्रहणम्, तेजो-वाय्वोर्गतिमात्रतया त्रसत्वेनाविवक्षणात् पृथगुपादानम्, इत्यादि दिशा षण्णां जीवनिकायाना विस्तर -अवान्तरतद्‌गतापरभेदप्रपञ्च उदित कथित, अनेन षड्जीवनिकायविस्तरकथनेन, सम्यक्परीक्षणक्षमा सम्यक्तया परीक्षणे क्षमा समर्था प्रमाणार, इदम षड्जीवनिकायविस्तर सम्यक् एव वक्तु प्रागश्च इत्येवद् वक्तुम्यासिन एव सर्वज्ञा भाव्य इत्येव परीक्षाविदुधा इति यावत्, प्रसादोदयोत्सवा भक्त प्रसादस्य-अनुग्रहस्य-य उदय आविर्भावस्तेन सोत्सवा इव-'प्रसद्योऽस्मासु भगवान् येनास्माक तत्त्वज्ञानार्थमीदृश शासनमुप दिष्टम्' इत्यानन्दतरङ्गिणीनिमग्नहृदया इव, त्वयि भगवति स्थिता भवन्त मेव ससारसागरोत्तारक वरिष्ठ मन्यमाना सुव्यवस्थिता इत्यर्थ ॥ १३ ॥

यस्यापि त्वयि सर्वज्ञविनिश्चयो नास्ति तस्याप्यन्यगतिविलक्षणोऽयमिति बुद्धिर्भवति, तद्बुद्ध्या च तद्वचनीयतामासाद्यत्येव भवानित्याह—

वपु सभावस्थमरक्तशोणित,
परानुकम्पासफल च भाषितम् ।
न यस्य सर्वज्ञविनिश्चयस्त्वयि,
द्वय करोत्येतदसौ न मानुष ॥ १४ ॥

वपुरिति । यस्य त्वयि सर्वज्ञविनिश्चयो न स्वभावस्थमरक्तशोणित वपु परानुकम्पासफल च भाषितमेतद्द्वयम्, असौ न मानुष, करोतीत्यन्वय । यस्य प्रमातु हे धीर' त्वयि केवलज्ञानवत्यपि षड्जीवनिकायविस्तरवक्तर्यपि, सर्वज्ञविनिश्चयो न अय सर्वज्ञ इति निर्णयेन निश्चयो नास्ति, तथा

स्वभावस्थं वपुः स्वस्वभावे व्यवस्थितं तव शरीरम्, एवं सद् अरक्तशोणितं रक्तशोणितरहितम्, अर्थात् क्षीरधवलशोणितसवलितम्, एतदनन्यजनसाधारणम्, परानुकम्पासफलं च भाषितं परं प्रति याऽनुकम्पा तया सफल-फलवत् परानुकम्पासफलं च, तव भाषितं वचनम्, एतद् द्वयं इत्थं स्मृतं शरीर-वचनद्वयम्, असौ वीर, न मानुषः किन्तु देव इति बुद्धिं करोति देवत्वादर्चनीयोऽयमित्यपि बुद्धिस्तस्य जायत एवेति, वस्तुतः 'न यस्य सर्वज्ञविनिश्चयस्त्वयि" इत्यस्य स्थाने "न यस्य सर्वज्ञविनिश्चयः त्वयि" इति पाठो युक्तः स्वभावस्थमरक्तशोणितं वपुः परानुकम्पासफलं भाषितं चैतद् द्वयं त्वयि यस्य सर्वज्ञविनिश्चयं न करोति असौ त्वयि सर्वज्ञत्वनिर्णयकर्तृत्वविकलः पुरुषः, न मानुषो मनुष्यो न भवति, सर्वज्ञत्वसाधकहेतुज्ञानसद्भावेऽपि सर्वज्ञत्वज्ञानाभावात्, किन्तु शृङ्ग-पुच्छविकलः पशुरेवासाविति हृद्यम् ॥ १४ ॥

तव तत्तत्प्रकाशातिशयभवत्रिभुवनव्यापियशः कथाऽस्तु नाम, तव प्रशिष्याणामपि त्वद्विचारप्रभाविता यादृशी यशःप्रथा तादृशी यशःप्रथा परवादिप्रकाण्डैरेकत्र सम्मिलितैरपि प्रथयितुमयोग्यैवेत्युपदिशति—

अलब्धनिष्ठाः प्रसमिद्धचेतस-
स्तव प्रशिष्याः प्रथयन्ति यद् यशः ।
न तावदप्येकसमूहसंहताः,
प्रकाशयेयुः परवादिपार्थिवाः ॥ १५ ॥

अलब्धनिष्ठा इति । अलब्धनिष्ठाः प्रसमिद्धचेतसस्तव प्रशिष्याः यद् यशः प्रथयन्ति, एकसमूहसंहताः परवादिपार्थिवास्तावदपि न प्रकाशयेयुरित्यन्वयः । हे वीर! तव भवतः, प्रशिष्याः शिष्यस्य शिष्याः, पारम्पर्येण शिष्या इति यावत्, कतिसंख्यकाः ? अलब्धनिष्ठाः न लब्धा-अलब्धा निष्ठा-विश्रान्तिः, अलब्धा निष्ठा यैस्ते अलब्धनिष्ठाः, प्रभूतसङ्ख्यकाः इत्यर्थः किम्भूताः ? प्रसमिद्धचेतसः प्रकर्षेण समिद्ध-समित्यादिगुणसम्पन्नं चेतोऽन्तःकरणं येषां ते प्रसमिद्धचेतसः एवंविधास्तव प्रशिष्याः यद् यशः प्रथयन्ति यादृग् जगद्विख्यातं यशः जैनमतगौरवविषयकगुणगानसमुल्लसितं यत् प्रथयन्ति-विस्तारयन्ति भव्यजनहृदयव्यापि कुर्वन्ति, एकसमूहसंहताः सर्वैरेकमत्यमत्याश्रित्यैकसमूहः स्वीयमनेकान्तवादिविनिर्मुक्तमारचय्य तत्र संहताः-सम्मिलिताः, प्रव-

वादिपार्थिवा एकान्तवादिना राजान -एकान्तवादिनामग्रेसरा, तावदपि भव प्रशिष्ययशस्समानमपि यश, न प्रकाशयेयु न लोकज्ञानविषय कुर्यु, दूरे भवद्यशस्समानयश प्रकाशनमभावना परवादिभिरिति हृदयम् ॥ १५ ॥

त्वयि ससारविकारोत्पादनपराङ्मुखा दुर्जना यदा भवन्ति तदा दुर्जननिर्वोपद्रवभयरहितैस्तव प्रशिष्यै लोकेऽस्मिन् सज्जनमनोज्ञ न किञ्चिद् च तदुत्सवो न्याय्य इत्येव सौकर्येण लोक प्रबोधितो भवतीत्याह—

यदा न ससारविकारसस्थिति
विगाह्यते त्वत्प्रतिघातनोन्मुखै ।
शठैस्तदा सज्जनवल्लभोत्सवो,
न किञ्चिदस्तीत्यभयै प्रबोधित ॥ १६ ॥

